# Shri Sudarshana Kavacham

# श्रीसुदर्शनकवचम्

## Document Information

Text title : sudarshana kavacha

File name : sudarshanakavacha.itx

Category : kavacha, vishhnu

Location : doc_vishhnu

Transliterated by : Usha Iyer

Proofread by : Usha Iyer, Krishna T

Latest update : January 23, 2011, February 16, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीसुदर्शनकवचम्

प्रसीद भगवन् ब्रह्मन् सर्वमन्त्रज्ञ नारद ।
सौदर्शनं तु कवचं पवित्रं ब्रूहि तत्त्वतः ॥ १॥

नारदः -
श्रुणुश्वेह द्विजश्रेष्ट पवित्रं परमाद्भुतम् ।
सौदर्शनं तु कवचं दृष्टाऽदृष्टार्थ साधकम् ॥ २॥

कवचस्यास्य ऋषिर्ब्रह्मा छन्दोनुष्टुप् तथा स्मृतम् ।
सुदर्शन महाविष्णुर्देवता सम्प्रचक्षते ॥ ३॥

ह्रां बीजं शक्ति रद्रोक्ता ह्रीं क्रों कीलकमिष्यते ।
शिरः सुदर्शनः पातु ललाटं चक्रनायकः ॥ ४॥

घ्राणं पातु महादैत्य रिपुरव्यात् दृशौ मम ।
सहस्त्रारः शृतिं पातु कपोलं देववल्लभः ॥ ५॥

विश्वात्मा पातु मे वक्रं जिह्वां विद्यामयो हरिः ।
कण्ठं पातु महाज्वालः स्कन्धौ दिव्यायुधेश्वरः ॥ ६॥

भुजौ मे पातु विजयी करौ कैटभनाशनः ।
षट्कोण संस्थितः पातु हृदयं धाम मामकम् ॥ ७॥

मध्यं पातु महावीर्यः त्रिनेत्रो नाभिमण्डलम् ।
सर्वायुधमयः पातु कटिं श्रोणिं महाध्युतिः ॥ ८॥

सोमसूर्याग्नि नयनः ऊरु पातु च ममकौ ।
गुह्यं पातु महामायः जानुनी तु जगत्पतिः ॥ ९॥

जङ्घे पातु ममाजस्त्रं अहिर्बुध्न्यः सुपूजितः ।
गुल्फौ पातु विशुद्धात्मा पादौ परपुरञ्जयः ॥ १०॥

सकलायुध सम्पूर्णः निखिलाङ्गं सुदर्शनः ।

य इदं कवचं दिव्यं परमानन्द दायिनम् ॥ ११॥

सौदर्शनमिदं यो वै सदा शुद्धः पठेन् नरः ।
तस्यार्थ सिद्धिर्विपुला करस्था भवति ध्रुवम् ॥ १२॥

कूष्माण्ड चण्ड भूताध्याः येच दुष्टाः ग्रहाः स्मृताः ।
पलायन्तेऽनिशं पीताः वर्मणोस्य प्रभावतः ॥ १३॥

कुष्टापस्मार गुल्माद्याः व्यादयः कर्महेतुकाः ।
नश्यन्त्येतन् मन्त्रिताम्बु पानात् सप्त दिनावधि ॥ १४॥

अनेन मन्त्रिताम्मृत्स्नां तुलसीमूलः संस्थिताम् ।
ललाटे तिलकं कृत्वा मोहयेत् त्रिजगन् नरः ॥ १५॥

इति श्रीभृगुसंहितोक्त श्रीसुदर्शन कवचं सम्पूर्णम् ॥

Encoded and proofread by Usha K.Iyer

*Shri Sudarshana Kavacham*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*